National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 110-113
© 2026 NJHSR
www.sanskritarticle.com

**डा. विनिताशर्मा**
सहायकाचार्या,
संस्कृतविभागः,
मोनादविश्वविद्यालयः

**सोनू शर्मा**
शोधच्छात्रः,
संस्कृतविभागः,
मोनादविश्वविद्यालयः

**Correspondence:**
**सोनू शर्मा**
शोधच्छात्रः,
संस्कृतविभागः,
मोनादविश्वविद्यालयः

# पाणिनिजैनेन्द्रयोर्लादेशप्रकरणस्य साम्यवैषम्यसमीक्षणम्

**डा. विनिताशर्मा , सोनू शर्मा**

### प्रस्तावना

संस्कृतव्याकरणशास्त्रे शब्दानां निर्माणप्रक्रिया अत्यन्तं सूक्ष्मतया निरूपिता अस्ति। पाणिनीयव्याकरणे धातु-प्रत्यय-आदेशादीनां विवेचनं वैज्ञानिकरीत्या कृतम् अस्ति। तेषु "आदेशः" इति संज्ञा महत्त्वपूर्णा वर्तते। आदेशस्य विभिन्नप्रकारेषु "लादेशः" अपि एकः महत्त्वपूर्णः विषयः अस्ति। यदा कश्चित् वर्णः, धातुः, प्रत्ययः वा अन्यस्य स्थाने विधीयते तदा आदेशः भवति। विशेषतः लकारसम्बद्धेषु कार्येषु यः आदेशः दृश्यते सः लादेशः इति कथ्यते।

### लादेशस्य स्वरूपम्

पाणिनीयव्याकरणे "आदेश" इति शब्दस्य अर्थः स्थानिनः स्थाने अन्यस्य विधानम् इति भवति। लकाराणां स्थाने यदा तिङ्प्रत्ययादयः विधीयन्ते अथवा लकारसम्बद्धपरिवर्तनानि भवन्ति तदा तानि कार्याणि लादेशरूपेण विवेच्यन्ते। "ल्" इति लकारसंज्ञकस्य निर्देशकरूपेण प्रयुज्यते। अतः लकारसम्बद्धः आदेशः लादेशः इति उच्यते। लकाराः संस्कृतव्याकरणे दश सन्ति—लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् च। एतेषां प्रयोगे विविधाः प्रत्ययाः भवन्ति। तेषां प्रत्ययानां विधानं, परिवर्तनं, आदेशः च व्याकरणे महत्त्वपूर्णं स्थानं धारयति।

### लादेशस्य आवश्यकता

भाषायाः सरलता, संक्षिप्तता, उच्चारणसौकर्यं च लादेशस्य प्रमुखप्रयोजनानि सन्ति। यदि प्रत्येकस्मिन् स्थले मूलरूपमेव प्रयुज्येत तर्हि भाषायाः प्रयोगः कठिनः स्यात्। अतः व्याकरणकारैः वर्णानां, प्रत्ययानां, धातूनां च स्थाने अन्यरूपाणाम् आदेशः विहितः। उदाहरणार्थं, "भू + लट्" इत्यत्र लकारस्य प्रभावेण "भवति" इति रूपं निष्पद्यते। अत्र लकारसम्बद्धाः प्रत्ययाः आदेशरूपेण प्रवर्तन्ते। एवं धातु-प्रत्यययोः संयोगे विविधपरिवर्तनानि दृश्यन्ते।

### लादेशस्य प्रकाराः

लादेशस्य विवेचनं व्यापकं वर्तते। तत्र प्रमुखतया निम्नलिखितरूपाणि दृश्यन्ते 1. तिङ्प्रत्ययादेशः- लकाराणां स्थाने तिङ्प्रत्ययानां विधानम्। 2. धात्वादेशः-विशेषपरिस्थितिषु धातोः स्थाने अन्यधातोः प्रयोगः। 3. वर्णादेशः- वर्णविशेषस्य स्थाने अन्यवर्णस्य विधानम्। 4. प्रत्ययादेशः- प्रत्ययस्य स्थाने अन्यप्रत्ययस्य प्रयोगः। एते सर्वे अपि पाणिनीयव्यवस्थायां नियमानुसारं प्रवर्तन्ते।

### पाणिनीयव्याकरणे लादेशस्य स्थानम्

पाणिनिना अष्टाध्याय्यां आदेशसम्बद्धाः बहवः सूत्राः प्रदत्ताः। "स्थानिवदादेशोऽनल्विधौ"[1] इति सूत्रं आदेशतत्त्वस्य आधारभूतं सूत्रम् अस्ति। अस्य अनुसारम् आदेशः अनेकस्मिन् कार्ये स्थानिवद् व्यवहरति। एषः सिद्धान्तः लादेशेऽपि प्रवर्तते। लकाराणां प्रयोगे परस्मैपद-आत्मनेपदप्रत्ययानां विधानं, पुरुष-वचनानुसारं तेषां परिवर्तनं, धातोः गुण-वृद्ध्यादिकार्याणि च आदेशतत्त्वेनैव सम्पन्नानि भवन्ति। प्रकृतस्थले पाणिनिजैनेन्द्रव्याकरणयोः लोदेशस्य कावधारणेति विशदीकरिष्यते।

**सूत्रस्य स्वरूपम्**

पाणिनिना सूत्रं पठितं तृतीयाध्यायस्य चतुर्थे पादे[2] जैनेन्द्रेण सूत्र पठितं पाणिनेर्व्यतिक्रमः जैनेन्द्रव्याकरणे लभ्यते प्रकृतस्थले सूत्रप्रसङ्गे ।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना लस्य स्थाने तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आतां-झ-थस-आथां-ध्वं-इट्-वहि-महिङ् इत्येतयादेशा उपदिष्टाः, जैनेन्द्रेणापि लस्य स्थाने तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आतां-झ-थास्-आथां-ध्वम्-इट्-वहि-महिङ् इत्येते आदेशाः उपदिष्टाः। उभयत्रापि व्याकरणयोः न कोऽपि भेदो वर्तते प्रत्ययेषु । तिप्प्रत्ययः प्रथमपुरुषैकवचनस्य द्योतकः पाणिनिनये पित्करणं तिप्प्रत्यये[3] इत्येतदर्थं जैनेन्द्रव्याकरणे च[4] इत्येतस्मिन् सूत्रे पित्करणस्य प्रयोजनं ज्ञातुं शक्यम् । अन्यत्सर्वं तु यथावदेव वर्तते। रूपाणि समानान्येव ।

भवति । भवतः । भवन्ति । एधते । एधेते । एधन्ते ।

भवसि । भवथः । भवथ । एधसे । एधेथे । एधध्वे ।

भवामि । भवावः । भवामः । एधे । एधावहे । एधामहे ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातं[5] जैनेन्द्रेण द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातं[6] उभयत्रापि सूत्रयोः पार्थक्यं वर्तते परमार्थतो न कोऽपि भेदो वर्तते ।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना टितां लकाराणाम् इकारस्य स्थाने एकारादेश आत्मनेपदे भवतु इति निर्दिष्टम् जैनेन्द्रेणापि समानरूपेण टितो लकाराणामिकारस्य स्थाने एकारादेश उपदिष्ट इति उभयोः साम्यं वर्तते। रूपाणि समानान्येव भवन्ति- एधते, एधेते, एधन्ते ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[7] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं व्यरचि[8] एवम्प्रकारेण उभयत्रापि सूत्रयोर्न कोऽपि भेदो दृष्टिपथम् अवतरति ।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना थासः स्थाने से इत्ययमादेशः पठितः टिल्लकारस्य, जैनेन्द्रेणापि समानरूपेण थासः स्थाने टिल्लकारस्य से इत्यसावादेशः निर्दिष्टः । रूपाणि समानानि- उभयत्र पचसे ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[9] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं व्यरचि[10] उभयत्रापि सूत्रयोर्न कोऽपि महान् भेदो वर्तते प्रत्यये तु वर्तत एव ।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना लिट्लकारयोः तझयोः स्थाने एश् तथा इरेच् प्रत्यययोः विधानम् उपदिष्टम्। जैनेन्द्रेण अपि समानरूपेण लिट्लकारस्य तझयोः स्थाने एशिरेप्रत्यययोरुपदेशो विहितः। पाणिनिना एश् इत्यत्र शकारोऽनुबन्धार्थः पठितः जैनेन्द्रेणापि शकारोऽनुबन्धार्थ एव पठितः। उभयत्रापि शित्करणस्य समानमेव प्रयोजनं वर्तते। पाणिनिना इरेच् इत्यत्र चकारोऽनुबन्धार्थः पठितः, चित्करणं च पाणिनिनये स्वरार्थम्। इरे इत्येव जैनेन्द्रेण प्रत्ययेऽस्मिन्, अनुबन्धस्य स्थानं नास्ति। उभयत्रापि रूपाणि समानान्येव दृग्गोचरीभवन्ति- एधाञ्चक्रे । एधाञ्चक्रिरे ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमपाठि[11] जैनेन्द्रेण द्वितीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[12] उभयत्रापि सूत्रयोः पार्थक्यं वर्तते। माशब्दः परस्मैपदवाचकः जैनेन्द्रव्याकरणे प्रत्ययानां क्रममतिरिच्य यथावत् वर्तते स्थितिः।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना परस्मैपदानां लिट्लकाराणां स्थाने यथाक्रमं णलतुसुस्थलथुसणल्वम इत्येते आदेशा निगदिताः जैनेन्द्रेण अपि लिटां मापां स्थाने अमी आदेशा निगदिताः। जैनेन्द्रस्य संख्या पाणिनेः विपरीता वर्तते प्रत्ययानाम् रूपाणि समानान्येव-

बभूव । बभूवतुः । बभूवुः ।

बभूविथ । बभूवथुः । बभूव ।

बभूव । बभूविव । बभूविम ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[13] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रमपाठि[14] उभयत्रापि सूत्रयोर्न कोऽपि भेदो वर्तते ।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना विद्धातोर्लटः स्थाने विकल्पेन णलादय उपदिष्टाः। जैनेन्द्रेणापि समानरीत्या इमे आदेशा उपदिष्टाः। रूपाण्यपि समान्येव दृग्गोचरीभवन्ति- वेद । विदतुः । विदुः ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[15] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[16] उभयत्रापि सूत्रयोर्न कोऽपि भेदो वर्तते । पाणिनिना पञ्चन् शब्दः प्रयुक्तः तथा च ब्रुव इति द्विरुक्तम् इत्येव वैशिष्ट्यम् ।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना ब्रुव् धातोश्च आहादेशः णलादयो वा निर्दिष्टा जैनेन्द्रेणापि तथैव निर्दिष्टम् अत उभयोः साम्यमस्तीति वक्तुं शक्यते। रूपाणि समानान्येव- आह । आहतुः । आहुः ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमपाठि[17] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं व्यरचि[18] इत्युभयोः सूत्रयोर्न कोऽपि भेदः दृग्गोचरीभवति ।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना लोट्लकारस्य प्रक्रिया लङ्लकार इव स्यात् इति निर्दिष्टम् । जैनेन्द्रेणापि समान एव विधिर्निर्दिष्टः । अतोऽत्र वक्तुं शक्यते उभयोर्विधयोः प्रकृतस्थले न कोऽपि भेदो वर्तते । रूपाणि समानान्येव- पचाव । पचाम ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं संगृहीतम्[19] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातम्[20] इत्युभयोर्न कोऽपि भेदः सूत्रयोरिति ज्ञातुं शक्यते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना लोट्लकारस्य इकारस्य स्थाने उकारादेशः उपदिष्टः तथैव जैनेन्द्रेणापि लोट्लकारस्य इकारस्य उकारादेशः कीर्तितः । रूपाणि तु समानान्येव- पचतु । पचन्तु । भवतु । भवन्तु ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्याये चतुर्थे पादे सूत्रमग्रथि[21] जैनेन्द्रेणापि चतुर्थाध्यायस्य तुर्ये पादे सूत्रमग्रथि[22] इत्युभयोः सूत्रयोर्न कोऽपि भेदो वर्तते इति वक्तुं शक्यते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना लोट्लकारस्य मध्यमपुरुषैकवचनस्य सेः स्थाने हि इत्ययमादेश उपदिष्टः। तथैव जैनेन्द्रेणापि सेः स्थाने हि इत्ययमादेशः निर्दिष्टः तथा च अपिद्वद्भावोऽप्युभाभ्यां निर्दिष्टः। रूपाणि तु समानान्येव- लुनीहि । पुनीहि । जहीहि ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं सङ्कलितं[23] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातं[24] उभयोः सूत्रयोर्न कोऽपि भेदो दृश्यते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना मेः स्थाने लोट्लकारस्य नि इत्यमादेशो निर्दिष्टः एवमेव जैनेन्द्रेणापि लोटलकारस्य मेः स्थाने नि इत्ययमादेश उपदिष्ट इत्युभयोः प्रत्यययोः न कोऽपि भेदो वर्तते । रूपाणि समानान्येव- पचानि । करवाणि ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं पठितं[25] एवमेव जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रे पठितं[26] इत्युभयोः सूत्रयोर्न कोऽपि भेदो दृश्यते।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना आत्मनेपदे लोट्लकारस्य इकारस्य एकारादेशो यो जातो तस्य आमादेशो निर्दिष्टः। जैनेन्द्रेणापि समानतया लोट एकारस्य आमादेश उपदिष्टः। इत्युभयोर्न कोऽपि भेदो दृश्यते। रूपाणि च समानान्येव- एधताम्। एधेताम् । एधन्ताम् ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं व्यरचि[27] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं व्यरचि[28] पाणिनिना-अकारस्य कथनपुरस्सरं सवाभ्याम् इति निर्दिष्टम् अथ च जैनेन्द्रेण अकारं विनैव निर्दिष्टम् इत्यत्र विशेषः ।

**प्रत्ययस्य स्वरूपम्-**
पाणिनिना लोट्लकारस्य सकारवकारयोः परयोरेकारयोः स्थाने यथाक्रमं व अम् अत्येतावादेशौ निर्दिष्टौ जैनेन्द्रेणापि समानरूपेण उभयोः स्थाने वमौ प्रत्ययौ निर्दिष्टौ। रूपाणि समानान्येव- एधस्व । एधध्वम् ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं सङ्कलितं[29] जैनेन्द्रेण द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातं[30] सूत्रयोः पार्थक्यं वर्तते जैनेन्द्रेण अस्मच्छब्दः उत्तमपुरुषाय प्रयुक्तः, अन्यत्सर्वं समानमेव ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना लोट्लकारस्य उत्तमपुरुषस्य आडागमस्य विधानं निर्दिष्टम् पिद्वद्भावश्च जैनेन्द्रेणापि समानरूपेण उत्तमपुरुषेषु त्रिषु वचनेषु आडागमः तथा पिद्वद्भावः निर्दिष्टः । इत्युभयोर्न कोऽपि भेदो वर्तते इति ज्ञातुं शक्यते । रूपाणि समानान्येव- भवानि । भवाव । भवाम ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं सङ्कलितम्[31] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातम्[32] इत्युभयोर्न कोऽपि भेदः सूत्रयोः दृश्यते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना आत्मनेपदस्य लोटः उत्तमपुरुषस्य एकारस्य स्थाने ऐकारादेशः निर्दिष्टः। तथैव जैनेन्द्रेणापि लोट आत्मनेपदस्य उत्तमपुरुषस्य एकारस्य ऐकारादेश उपदिष्टः, इत्युभयोर्न कोऽपि भेदः दृश्यते । रूपाणि तु समानान्येव- एधै । एधावहै । एधामहै ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[33] जैनेन्द्रेण द्वितीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[34] क्रममतिरिच्य सर्वमपि यथावत् वर्तते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना तस्थस्थमिपां स्थाने तान्तन्तामादेशा निर्दिष्टाः सन्ति ङितां लकाराणाम्। जैनेन्द्रेणापि समानादेशाः समानानां तस्थस्थमिपां स्थाने निर्दिष्टा ङितां लकाराणाम् इति उभयोः न कोऽपि भेदो वर्तते इति ज्ञातुं शक्यते। उदाहरणम्- अपचम्। अपचतम् । अपचत ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रमपाठि[35] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रमग्रथि[36] इत्युभयोर्न कोऽपि भेदो वर्तते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना आशीर्लिङ्लकारस्य सीयुडागमविधानं निर्दिष्टम् जैनेन्द्रेणापि समानरीत्या सीयुडागमस्य विधानं निर्दिष्टम् । रूपाणि तु समानान्येव- एधेय । एधेवहि । एधेमहि । सीयुट् इत्यत्र सीय् इत्येवशिष्यते उभयत्रापि ।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं प्रवर्तितं[37] जैनेन्द्रेण द्वितीयाध्यायस्य चतुर्थे पादे सूत्रमपाठि[38] इत्युभयोः पार्थक्यं दृश्यते परं परस्मैपदशब्दो म इत्यनेन जैनेन्द्रव्याकरणेऽभिधीयते उदात्तस्य जैनेन्द्रव्याकरणे चर्चा नादृता, अतः तस्य अभावो दृश्यते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिना लिङः परस्मैपदिनः यासुडागमः तथा च ङिद्वद्भावः निर्दिष्टः एवमेव जैनेन्द्रेणापि परस्मैपदिनो लिङो यासुडागमो ङिद्वद्भावश्च निर्दिष्टः वर्तते। यासुट् इत्यत्र उटावितौ, उभयत्रापि यास् इत्येवावशिष्यते। रूपाणि समानानि एव- भूयात्। भूयास्ताम्। भूयासुः।

**सूत्रस्य स्वरूपम्**
पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातं[3] जैनेन्द्रेण च द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं प्रवृत्तं[40] उभयत्रापि सूत्रयोर्न कोऽपि भेदो वर्तते ।

**प्रत्ययस्य स्वरूपम्**
पाणिनिनाशिषि लिङो यासुडागमो विहितः, तथा च किद्भावश्च प्रदर्शितः । जैनेन्द्रेणापि समानरूपेण यासुडागम आशिषि विहितः, इत्युभयोः साम्यं द्रष्टुं शक्यते । रूपाणि समानान्येव दृश्यन्ते- भूयासम्। भूयास्व । भूयास्म ।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं प्रवृत्तं[41] जैनेन्द्रेणापि सूत्रं प्रवृत्तं[42] द्वितीयाध्यायस्य चतुर्थे पादे, इत्युभयोः सूत्रयोर्न कोऽपि भेदो वर्तते इति ज्ञातुं शक्यते।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना लिङः यौ तिथौ तयोः सुडागमस्य विधानं निर्दिष्टम् अथ च जैनेन्द्रेणापि समानतया लिङ्लकारस्य यौ तिथौस्तः तयोः स्थाने सुडागमस्य विधानं निर्दिष्टम्। टित्करणमुभयत्रापि[43] इत्येतदर्थम्। उकार उच्चारणार्थः। सकार एवावशिष्यते उभयत्रापि। रूपाणि समानानि- पक्षीष्ठाः। पक्षीयास्थाम्।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं समाम्नातं[44] जैनेन्द्रेणापि द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं प्रवृत्तं[45] उभयत्रापि सूत्रयोर्न कोऽपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना लिङ्लकारस्य झि इत्येतस्य स्थाने जुसादेशो निर्दिष्टः। जैनेन्द्रेणापि समानरूपेणायमेव आदेशो निर्दिष्टः। उभयत्रापि उस् इत्येवावशिष्यते। रूपाणि समानान्येव- कुर्युः। क्रियासुः।

**सूत्रस्य स्वरूपम्**

पाणिनिना तृतीयाध्यायस्य चतुर्थे पादे सूत्रं सङ्कलितं[46] जैनेन्द्रेणापि समानरूपेण द्वितीयाध्यायस्य चतुर्थे पादे सूत्रं सङ्कलितं[47] उभयत्रापि सूत्रयोर्न कोऽपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना आकारान्तात् परस्य झेर्जुसादेशो निर्दिष्टः। जैनेन्द्रेणापि समानरूपेणैव जुसादेशोऽसौ प्रकृतस्थले उपदिष्टः। रूपाणि उभयत्रापि समानान्येव- अस्थुः। अगुः। अयुः।

**उपसंहारः**

संस्कृतव्याकरणपरम्परायां लादेशः (लकारस्य आदेशः अथवा धात्वादिषु विशेषादेशः) अत्यन्तमहत्त्वपूर्णः विषयः अस्ति। पाणिनीयव्याकरणे तथा जैनेन्द्रव्याकरणे आदेशप्रक्रियायाः स्वरूपे साम्यं दृश्यते, किन्तु तयोः प्रस्तुतीकरणे, सूत्ररचनायां तथा कार्यप्रणाल्यां भेदोऽपि विद्यते। पाणिनीयव्याकरणे लादेशव्यवस्था अत्यन्तं सूक्ष्मा, तर्कसंगता तथा परिभाषानियमसमन्विता अस्ति। जैनेन्द्रव्याकरणे तदेव तत्त्वं सरलीकृतरूपेण उपस्थापितम्। अतः पाणिनीयपद्धतिः शास्त्रीयदृष्ट्या गाम्भीर्ययुक्ता, जैनेन्द्रपद्धतिश्च अध्यापनदृष्ट्या सुलभा इति निष्कर्षः। उभयोरपि व्याकरणयोः लादेशव्यवस्था संस्कृतरूपनिर्माणप्रक्रियायाः महत्त्वपूर्णमङ्गं वर्तते।

**सन्दर्भ ग्रन्थः**

1 तिप्-तस्-झि-सिप्-थस्-थ-मिब्-वस्-मस्- तातां- झ- थसाथां- ध्वमिड्व हिमहिङ् अ. सू. ३.४.७८

2 मिब्वस्मस्सिप्थस्थतिप्तस्झीड्वहिमहिथासाथांध्वंतातांझङ् जै.सू.२.४.६४

3 सार्वधातुमममपित् अ. सू. १.२.४

4 गोपित् जै. सू. १.१.७८

5 टित आत्मनेपदानां टेरे अ. सू. ३.४.७९

6 टिइटेरे जै. सू. २.४.६५

7 थासः से अ. सू. ३.४.८०

8 थासः से जै. सू. २.४.६६

9 लिटस्तझयोरेशिरेच् अ. सू. ३.४.८१

10 लिटस्तझयोरेशिरे जै. सू. २.४.६७

11 परस्मैपदानां णलतुसुस्थलथुसणल्वमाः अ. सू. ३.४.८२

12 मानां णल्वमथाथुसणलतुसुसः जै. सू. २.४.६८

13 विदो लटो वा अ. सू. ३.४.८३

14 विदो लटो वा जै. सू. २.४.६९

15 ब्रुवः पञ्चानामादित आहो ब्रुवः अ. सू. ३.४.८४

16 ब्रुव आहश्च जै. सू. २.४.७०

17 लोटो लङ्वत् अ. सू. ३.४.८५

18 लोटो लङ्वत् जै. सू. २.४.७२

19 एरुः अ. सू. ३.४.८६

20 एरुः जै. सू. २.४.७३

21 सेर्ह्यपिच्च अ. सू. ३.४.८७

22 सेर्ह्यपिच्च जै. सू. २.४.७४

23 मेर्निः अ. सू. ३.४.८९

24 मेर्निः जै. सू. २.४.७५

25 आमेतः अ. सू. ३.४.९०

26 आमेतः जै. सू. २.४.७६

27 सवाभ्यां वामौ अ. सू. ३.४.९१

28 स्वो वामौ जै. सू. २.४.७७

29 आडुत्तमस्य पिच्च अ. सू. ३.४.९२

30 पिच्चाडस्मदः जै. सू. २.४.७८

31 एत ऐ अ. सू. ३.४.९३

32 एत ऐ जै. सू. २.४.७९

33 तस्थस्थमिपां तान्तन्तामः अ. सू. ३.४.१०१

34 मिप्थस्थतसोऽम्तंतताम् जै. सू. २.४.८२

35 लिङः सीयुट् अ. सू. ३.४.१०२

36 लिङः सीयुट् जै. सू. २.४.७३

37 यासुट् परस्मैपदेषूदात्तो ङिच्च अ. सू. ३.४.१०३

38 यासुण् मो ङित् जै. सू. २.४.८४

39 किदाशिषि अ. सू. ३.४.१०४

40 किदाशिषि जै. सू. २.४.८५

41 सुट्तिथोः अ. सू. ३.४.१०७

42 सुट्तिथोः जै. सू. २.४.८७

43 आद्यन्तौ टकितौ अ. सू. १.१.४६

44 झेर्जुस् अ. सू. ३.४.१०८

45 झेर्जुस् जै. सू. २.४.८८

46 आतः अ. सू. ३.४.११०

47 आतः जै. सू. २.४.९०